Time : 3 Hours

**SANSKRIT (T.L.)**

Subject Code

| S | 1 | 1 | 3 | 5 |
|---|---|---|---|---|

**Total No. of Questions : 52 (Printed Pages : 11) Maximum Marks : 80**

**सूचना :** (*i*) प्रश्नानां क्रमाङ्काः स्पष्टतया लेखनीयाः।

(*ii*) **सर्वे** प्रश्नाः अनिवार्याः सन्ति।

(*iii*) दक्षिणभागे दर्शिताङ्काः गुणा सन्ति।

(*iv*) सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः।

(*v*) स्वभाषा नाम हिन्दी, मराठी, कोंकणी, आङ्ग्लभाषा वा।

**अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत।**

एनां वार्तां यदा कौरवाः श्रोष्यन्ति तदा सर्वे जयद्रथरक्षणार्थं प्रयत्नान् करिष्यन्ति तव च जीवनं वृथा नङ्क्ष्यति। तच्छ्रुत्वा पाण्डववीराः कथमर्जुनः प्रतिज्ञासागरं यशस्वितया तरिष्यतीति विचिन्त्य उन्निद्राः आसन्। कौरववीराः अपि जयद्रथरक्षणे विचारमग्नाः नालभन्त निद्राम्। अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन जयद्रथाय रक्षणं प्रतिश्रुतम्। द्रोणाचार्योऽपि प्रार्थितः।

**प्रश्नाः**

(1) पाण्डवाः किमर्थम् उन्निद्राः आसन् ? (**दश**पदैः उत्तरत) 2

(2) अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन किं किं कृतम् ? (**दश**पदैः उत्तरत) 2

(3) परिच्छेदात् ल्यबन्तम् अव्ययं चित्वा लिखत। 1

**अधस्तनं पद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत।**

नष्टं द्रव्यं लभ्यते कष्टसाध्यं

नष्टा विद्या लभ्यतेऽभ्यासयुक्ता।

नष्टारोग्यं सूपचारैः सुसाध्यं

नष्टा वेला या गता सा गतैव॥

चिन्ता चिता समानास्ति बिन्दुमात्रविशेषतः।

सजीवं दहते चिन्ता निर्जीवं दहते चिता॥

**प्रश्नाः**

(4) नष्टं द्रव्यम् आरोग्यं च कथं प्राप्यते ? (**दशपदैः** उत्तरत) 2

(5) 'सजीवम्' इति पदस्य विलोमपदं पद्यखण्डात् चित्वा लिखत। 1

**अधस्तनवाक्यानि कः कं प्रति अवदत् तत् लिखत।**

(6) "जानासि त्वं ? अस्माकं ध्वजस्य किं नाम ?" 1

(7) "महापङ्के पतितोऽहं प्रिये।" 1

**एकस्य गद्यखण्डस्य स्वभाषया अनुवादं कृत्वा लिखत।** 4

(8) भाऊसाहेबस्य विविधासु कलासु अपि रुचिरवर्तत। गोवा कलाअकादमी तदुदाहरणम्। स्वमातरं स्वदेशं प्रति च तस्य मनसि दृढा भक्ति प्रेमभावः चास्ताम्। गोवा मुक्तिसङ्ग्रामे तस्य महत् योगदानम् आसीत्। गोमन्तक-विकासव्रतं धारयन् सः ज्ञानक्षेत्रे, क्रीडाक्षेत्रे, गोवाविकासक्षेत्रे च अहर्निशं प्रायतत। अतः सततोद्यमशीलः एषः महाभागः सर्वेषां प्रेरणास्थानं खलु।

**अथवा**

छात्रा: – अयि ज्येष्ठा:। भवत्सकाशात् वयं गोमन्तकस्य लोकजीवनविषये ज्ञातुं समुत्सुका:। कृपया अस्मान् सविस्तरं कथयन्तु भवन्त:।

सञ्जय: – गोमन्तकस्य लोकजीवनं समृद्धं निसर्गानुरूपं च विद्यते। गोमन्तकीया: जना: निसर्गप्रिया: खलु।

कृष्ण: – पश्यतु अत्रत्या: भूमिका, शांतेरी, शान्तादुर्गा, केळम्बा (केळबाई) शिव: (ईश्वर:) इत्यादिका: ग्रामदेवता:, रवळनाथ-वेताळादय: संरक्षक-देवता: प्राकृतिक्य: एव।

**एकस्य सुभाषितस्य अनुवादं स्वभाषया लिखत।** 2

(9) व्यसने मित्रपरीक्षा, शूरपरीक्षा रणाङ्गणे भवति।
विनये भृत्यपरीक्षा, दानपरीक्षा च दुर्भिक्षे॥

**अथवा**

वृथाभ्रमणकुक्रीडा परपीडापभाषणै:।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्॥

**प्रश्नानाम् उत्तराणि स्वभाषया लिखत।** 2

(10) वञ्चक: कर्पूरतिलकसमीपं गत्वा किम् उवाच ?

**अथवा**

माण्डवी नद्या: विविधा: उपयोगा: के सन्ति ?

(11) गोमन्तकीयाः वनसंरक्षणविषये दायित्वं पशुवृक्षविषये कृतज्ञतां च कथं प्रकटयन्ति ? 2

**अथवा**

त्रिवर्णध्वजस्य पट्टिकानां महत्त्वं लिखत।

**प्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया लिखत।**

(12) जलप्रवाहानां जलं कीदृशं विद्यते ? 1

(13) कर्पूरतिलकः कस्य वचसि विश्वासं कृतवान् ? 1

(14) माण्डवी कदा खिन्ना भवति ? 1

(15) नीतिनिपुणाः कान् निन्दन्तु ? 1

**सुभाषितानि पूर्णानि, शुद्धानि च लिखत।**

(16) एकोना ........................ ।........................ ॥ 2

(17) बालो वा ........................ ।........................ ॥ 2

(18) शीलं सद्गुण ........................ ।........................ ॥ 2

**वाक्यांशयोः मेलनं कृत्वा लिखत।**

| | **'अ' स्तम्भः** | | **'आ' स्तम्भः** | |
|---|---|---|---|---|
| (19) | मासान्तेऽहं | – | थळ इति स्थानम् अस्ति। | 1 |
| (20) | पर्वतस्य मूलभागे | – | धनी भविष्यामि। | 1 |
| | | – | मुळस इति स्थानम् अस्ति। | |

**अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत।**

स्वातन्त्र्यप्राप्तेः ७५ तमस्य वर्षस्य अयम् उत्सवः 'अमृतकालोत्सव' इति नाम्ना ख्यातः। अस्मिन् अवसरे एव भारतस्य राजधान्यां देहल्यां नूतनस्य संसद्-भवनस्य उद्घाटनं मे मासस्य २८ तमे दिनाङ्के कृतम्। एतस्मिन् भवने लोकसभायाः राज्यसभायाः च जनप्रतिनिधयः युगपद् एकत्र उपवेष्टुं स्थलं कल्पितमस्ति। लोकसभायाः भागः भारतस्य राष्ट्रपक्षी मयूरः इव, राज्यसभायाः भागः राष्ट्रपुष्पं कमलम् इव च निर्मितम् अस्ति। भवनस्य त्रीणि मुख्यद्वाराणि। ज्ञानद्वारम्, शक्तिद्वारम्, कर्मद्वारम् इति तेषां नामानि। त्रीणि गौणद्वाराणि अपि सन्ति। द्वाराणां पालकत्वेन अश्व-मकर-गरुड-गज-हंस-शार्दूलानां शिल्पानि उत्कीर्णानि। एते अश्व-मकरादयः आकाशजलादितत्त्वानां प्रातिनिध्यं वहन्ति।

**प्रश्नाः—**

(21) लोकसभायाः राज्यसभायाः च भागयोः निर्माणं कथं कृतम् अस्ति ? (**दश**पदैः उत्तरत) 2

(22) द्वाराणां पालकत्वेन केषां शिल्पानि उत्कीर्णानि सन्ति ? (**दश**पदैः उत्तरत) 2

(23) 'प्रसिद्धः' इति शब्दस्य परिच्छेदात् पर्यायपदं चित्वा लिखत। 1

(24) गौणद्वाराणि अपि सन्ति। (वाक्यं एकवचने लिखत) 1

**अधस्तनं पद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया लिखत।**

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम्॥
उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम्।
सोत्साहस्य हि लोकेषु न किञ्चिदपि दुर्लभम्॥

**प्रश्नाः —**

(25) सर्वार्थसाधनं किम् अस्ति ? 1

(26) लोकेषु कस्य कृते किञ्चिदपि दुर्लभं न भवति ? 1

(27) शुकसारिकाः केन बध्यन्ते ? 1

**अधोलिखितयोः परिच्छेदयोः एकस्य अनुवादं स्वभाषया लिखत।** 3

(28) सेवकः — भवान् धनवान् अस्ति खलु ? भवतः समीपे प्रचुरं धनम् अस्ति अतः भवान् प्रसन्न अस्ति; तर्हि भवतः जीवनम् अपि सुखमयम् अस्ति वा ?

उद्योगपतिः — कथं सुखमयं जीवनं भविष्यति मम ? प्रचुरं धनं तु अस्ति मम समीपे। परन्तु तस्य रक्षणं कथं करणीयम् इति चिन्ता मां सर्वदा बाधते। अतः अहं चिन्तयामि मम जीवनं दुःखमयम् अस्ति।

**अथवा**

पुरा चम्पानगर्यां प्रसिद्धः विष्णु-देवालयः आसीत्। अथैकदा वङ्गप्रदेशात् कालिचरणः नाम कश्चन् भक्तः देवदर्शनार्थम् आगतवान्। तदवसरे महती वृष्टिः आरब्धा। वृष्टेः समाप्तेः अनन्तरं सः लड्डुकानाम् आपणम् अपश्यत्। आपणिकः धनं विना एव कालिचरणाय कतिचन लड्डुकान् दत्तवान्। कालिचरणः सन्तोषेण असेवत। भोजनानन्तरं सः देवालयं प्रति प्रस्थितवान्। वृष्टिकारणत् मार्गः जलपूर्णः च आसीत्।

**अधोलिखितवाक्येषु रिक्तस्थानानि पूरयितुं योग्यं पदं चिनुत।**

(29) सरित्, तटिनी, गङ्गा, निम्नगा इत्यादीनि मम .................. नामानि। 1

- अन्यानि
- अन्यात्
- अन्यस्य
- अन्यम्

(30) भाऊसाहेबः .............................. रमते। 1

- छात्राणां
- छात्रेभ्यः
- छात्रेषु
- छात्रात्

(31) त्रयाणां .......................... अत्र कः विशेषः। 1

- वर्णेषु
- वर्णानाम्
- वर्णैः
- वर्णेन

(32) मया बुद्धिप्रभावात् .......................... मरणं साधयितव्यम्। 1

- इमम्
- अयम्
- अस्मिन्
- अस्य

(33) तस्यै तृप्तिपर्यन्तं प्रभूतं घासादिकम् अयच्छत्। (स्म अव्ययं योजयत) 1

**अथवा**

राजा विना स्थातुं न युक्तः। (वाक्यं संशोध्य लिखत)

(34) मठग्रामतः चन्द्रनाथपर्वतः १२ कि.मि. दूरे अस्ति। (सङ्ख्यास्थाने सङ्ख्यावाचिपदं लिखत) 1

**अथवा**

शृगालानां भोजनविषयः अभवत्। (लृट् लकारे परिवर्त्य लिखत)

**रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत।**

(35) सः <u>गाम्</u> अपूजयत्। 1

(36) <u>तत्क्षणे</u> श्रीकृष्णः अन्धःकारं निस्सारितवान्। 1

तालिकायां रिक्तस्थानेषु समस्तपदम्/विग्रहम्/समासनाम वा लिखत।

| | समस्तपदम् | विग्रहः | समासनाम | |
|---|---|---|---|---|
| (37) | .................. | स्थाने स्थाने | अव्ययीभावः | 1 |
| (38) | मासानन्तरम् | ................... | पञ्चमीतत्पुरुषः | 1 |
| (39) | महापङ्कः | महान् पङ्कः | ................... | 1 |

(40) लघ्वपि – इत्यस्य सन्धिविग्रहं कुरुत। 1

(41) प्रशान्तस्तदा – इत्यस्य सन्धिविग्रहं कुरुत। 1

(42) पतितोऽहम् – इत्यस्य सन्धिविग्रहं कुरुत। 1

(43) 'सूर्यः' इत्यस्य उचितं पर्यायपदं चित्वा लिखत। 1

- मित्रम्
- मित्रः
- सूत्रम्
- पत्रम्

(44) 'विशालम्' इत्यस्य उचितं पर्यायपदं चित्वा लिखत। 1

- जलम्
- चित्तम्
- गगनम्
- महत्

(45) 'उन्मीलितम्' इत्यस्य उचितं विलोमपदं चित्वा लिखत। 1

- निमीलितम्
- निष्पीडितम्
- त्यक्तम्
- चकितम्

(46) 'कृपणः' इत्यस्य उचितं विलोमपदं चित्वा लिखत। 1

- निपुणः
- सद्गुणः
- दाता
- चिद्गुणः

(47) 'त्यज्' धातोः क्त्वान्तम् अव्ययं चित्वा लिखत। 1

- त्यजित्वा
- तजयित्वा
- त्यक्त्वा
- त्यत्वा

(48) 'आ + कर्ण्' धातोः ल्यबन्तम् अव्ययं चित्वा लिखत। 1

- आकर्ण्य
- आक्रण्य
- आगत्य
- आकर्ण

(49) **कोष्ठकात् उचितपदानि चित्वा चत्वारि सार्थकवाक्यानि लिखत।** 4

| | | |
|---|---|---|
| वयम् | सभायां | पतन्ति। |
| मोहिनी | वृक्षात् | पठाम:। |
| युवाम् | हॉकिक्रीडां | नृत्यति। |
| पत्राणि | भगवद्गीतां | क्रीडथ:। |

(50) **मञ्जूषायां दत्तपदानां साहाय्येन कथापूर्तिं कृत्वा कथां पुनः लिखत।** 4

(मुनीनां, तस्या:, भवति, बदरीफलानि, खादित्वा, जानाति, वने, उत्तिष्ठति)

शबरी भिल्लकुलीया आसीत्। सा .............. निवसति स्म, तथा .............. सेवां च करोति। सा प्रतिदिनं प्रात:शीघ्रम् .............. काष्ठानां सङ्ग्रहं च करोति स्म। सा सूर्योदयात् पूर्वं मार्गं सम्मार्जयति स्म। एतादृशीं सेवां का करोति इति कोऽपि न ..............। एकदा मतङ्गमहर्षि: दूरं स्थित्वा .............. सेवां पश्यति सन्तुष्ट: च भवति; अनन्तरं तस्या: समीपं गत्वा आशीर्वादं ददाति। तस्या: निवासाय पर्णकुटीं व्यवस्थापयति। कालेन शबरी वृद्धा ..............। श्रीराम: तत् अरण्यम् आगच्छति तदा सा शबरी रामाय .............. अर्पयति। राम: तानि .............. सन्तुष्ट: भवति। 'चिरं जीव' इति आशीर्वादं च ददाति।

(51) **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत।** 4

- मालतीमाधवौ कुम्भकारस्य गृहाद् दशघटान् अक्रीणाताम्।
- नन्दिनी माधवं पृष्ठभादाभ्यां ताडयित्वा रक्तरञ्जितमकरोत्।
- माधवस्य चक्षुरुन्मीलितं यत् लघ्वपि कार्यम् अविचार्य न कर्तव्यम्।
- प्रसन्न: माधव: स्वधेनुम् अहर्निशम् असेवत।
- माधव: मालतीं नन्दिनी दुग्धहीना किमर्थं जाता इति उक्तवान्।
- भागिनेय: माधवं यज्ञविषये सर्वं सूचितवान्।
- पुरातनकाले माधवो नाम गोपालक: आसीत्।
- पात्रहस्त: स: दोहनाय गो: समीपं गच्छति।

(52) **भारतदेशः अथवा मम प्रियः उत्सवः एतयोः कमपि एकं विषयम् अधिकृत्य संस्कृतभाषया अष्टवाक्यानि लिखत।** 4

**अथवा**

**चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन संस्कृतभाषया अष्टवाक्यानि लिखत।**

(शशः, शुनकः, चित्रपतङ्गः, चटकाः, सङ्गणकः, पश्यति, सेतुः, जलप्रवाहः)

